स्तुतः। कुबलाश्वस्य पुत्राणां सहस्राण्येकविंशतिः। सर्वे विद्यासु निष्णाता बलवन्तः सुदारुणाः। कुबलाश्वश्च पितृतो गुणैरभ्यधिकोऽभवत्। समये तं पिता राज्ये बृहदश्वोऽभ्यषेचयत्। कुवलाश्वं महाराज। शूरमुत्तमधार्म्मिकम्। पुत्रसंक्रामितश्रीस्तु बृहदश्वो महीपतिः। जगाम तपसे धीमांस्तपोवनममित्रहा"। इत्युपक्रम्य मधुकैटभयोःसमुत्पत्तिवधकथान्ते २०३अ० "मार्कण्डेयउवाच। धुन्धुर्नाम महाराज! तयोः पुत्रोमहाद्युतिः। स तपोऽतप्यत महत् महावीर्य्यपराक्रमः। अतिष्ठदेकपादेन कृशो धमनिसन्ततः। तस्मै ब्रह्मा ददौ प्रीतो वरं वव्रे स च प्रभुम्। देवदानवयक्षाणां सर्पगन्धर्वरक्षसाम्। अवध्योऽहं भवेयं वै वर एष वृतो मया। एवं भवतु गच्छेति तमुवाच पितामहः। स एवमुक्तस्तत्पादौ मूर्द्ध्नाऽऽस्पृश्य जगाम ह। स तु धुन्धुर्वरं लब्ध्वा महावीर्य्यपराक्रमः। अनुस्मरन् पितृवधं द्रुतं विष्णुमुपागमत्। स तु देवान् सगन्धर्वान् जित्वा धुन्धुरमर्षणः। बबाधे सर्वानसकृद्विष्णुं देवांश्च वै भृशम्। समुद्रे बालुकापूर्णे उज्जालक इति स्मृते। आगम्य च स दुष्टात्मा तं देशं भरतर्षभ!। बाधते स्म परं शक्त्या तमुतङ्काश्रमं विभो!। अन्तर्भूमिगतस्तत्र बालुकान्तर्हितस्तथा। मधुकैटभयोः पुत्रो धुन्धुर्भीमपराक्रमः। शेते लोकविनाशाय तपोबलमुपाश्रितः। उतङ्कस्याश्रमाभ्याशे निःश्वसन् पावकार्च्चिषः। एतस्मिन्नेव काले तु राजा सबलवाहनः। उतङ्कविप्रसहितः कुबलाश्वो महीपतिः। पुत्रैः सह महीपालः। प्रययौ भरतर्षभ!। सहस्रैरेकविंशत्या पुत्राणामरिमर्द्दनः। कुबलाश्वो नरपतिरन्वितो बलशालिनाम्। तमाविशत्ततो विष्णुर्भगवांस्तेजसा प्रभुः। उतङ्कस्य नियोगेन लोकानां हितकाम्यया। तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत्। एष श्रीमानवध्योऽद्य धुन्धुमारो भविष्यति। दिव्यैश्च पुष्पैस्तं देवाः समन्तात् पर्य्यवाकिरन्। देवदुन्दुभयश्चापि नेदुः स्वयमनीरिताः। शीतश्च वायुः प्रववौ प्रयाणे तस्य धीमतः। विपांसुलां महीं कुर्वन् ववर्ष च सुरेश्वरः। अन्तरीक्षे विमानानि देवतानां युधिष्ठिर!। तत्रैव समदृश्यन्त धुन्धुर्यत्र महासुरः। कुबलाश्वस्य धुन्धोश्च युद्धं कौतूहलान्विताः। देवगन्धर्वसहिताः समवैक्षन्महर्षयः। नारायणेन कौरव्य! तेजसाप्यायितस्तदा। स गतो नृपतिः क्षिप्रं पुत्रैस्तैः सर्वतो दिशम्। अर्णवं खानयामास कुबलाश्वोमहीपतिः। कुबलाश्वस्य पुत्रैश्च तस्मिन् वै बालुकार्णवे। सप्तभिर्द्दिवसैः खात्वा दृष्टो धुन्धुर्म्महाबलः। आसीद्घोरं वपुस्तस्य बालुकान्तर्हितं महत्। दीप्यमानो यथा सूर्य्यस्तेजसा भरतर्षभ!। ततो धुन्धुर्म्महाराज! दिशमावृत्य पश्चिमाम्। सुप्तोऽभूद्राजशार्दूल! कालानलसमद्युतिः। कुबलाश्वस्य पुत्रैस्तु सर्वतः परिवारितः। अभिद्रुतः शरैस्तीक्ष्णैर्गदाभिर्म्मुसलैरपि। पट्टिशैः परिघैः प्रासैः खड्गैश्च विमलैः शितैः। स बध्यमानः संक्रुद्धः समुत्तस्थौ महाबलः। क्रुद्धश्चाभक्षयत्तेषां शस्त्राणि विविधानि च। आस्याद्वमन् पावकं स संवर्त्तकसमं तदा। तान् सर्वान् नृपतेः पुत्रानदहत् स्वेन तेजसा। मुखजेनाग्निना क्रुद्धो लोकानुद्वर्त्तयन्निव। क्षणेन राजशार्दूल! पुरेव कपिलः प्रभुः। सगरस्यात्मजान् क्रुद्धस्तदद्भुतमिवाभवत्। तेषु क्रोधाग्निदग्धेषु तदा भरतसत्तम!। तं प्रबुद्धं महात्मानं कुम्भकर्णमिवापरम्। आससाद महातेजाः कुबलाश्वो महीपतिः। तस्य वारि महाराज! सुस्राव बहु देहतः। तदापीयत तत्तेजो राजा वारिमयं नृप!। योगी योगेन वह्निञ्च शमयामास वारिणा। ब्रह्मास्त्रेण च राजेन्द्र! दैत्यं क्रूरपराक्रमम्। ददाह भरतश्रेष्ठ! सर्वलोकाभयाय वै। सोऽस्त्रेण दग्ध्वा राजर्षिः कुबलाश्वो महासुरम्। सुरशत्रुममित्रघ्नं त्रैलोक्येश इवापरः। धुन्धोर्बधात्तदा राजा कुबलाश्वो महामनाः। धुन्धुमार इति ख्यातो नाम्नाऽप्रतिरथोऽभवत्"।

**कुबे(वे)र** पु० कुम्बति धनम् कुबि—एरक् नि० नलोपश्च कुत्सितं वेरमस्य इति वा। १धनदे यक्षराजे अमरः "कुत्सायां क्विति शब्दोऽयं शरीरं वेरमुच्यते। कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः" वायुपु०। "कुवेरोभव नाम्ना त्वं मम क्षमेर्ष्यया सुत!" काशीख० देवीशापोक्तेस्तस्य तथात्वम्। "कुवेरस्य मनःशल्यं शंसतीव पराभवम्" कुमा०। तस्येदमण्। तत्सम्बन्धिनि त्रि० स्त्रियां ङीप् "कौवेरदिग्भगमपास्य मार्गम्" माघः। क्षुभ्ना० पाठात् कुवेरवनमित्यादौ न णत्वम् वाकप्। कुवेरकोऽप्यत्रार्थे कुशतिस०। २निन्दितदेहे न०।

**कुबेराक्षी** स्त्री कुवेरस्याक्षीव पिङ्गलं पुष्पमस्याः षच् समा० ङीप्। १पाटलावृक्षे २लताकरञ्जे च राजनि०।

**कुबे(वे)राचल** पु० ६त०। कैलासपर्वते जटा० तस्य कुवे-